National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2024**; 1(55): 243-245
© 2024 NJHSR
www.sanskritarticle.com

**Puspanjali Paikaray**
Research Scholar,
Department of Sanskrit,
Utkal University,
Bhubaneswar

**Correspondence:**
**Puspanjali Paikaray**
Research Scholar,
Department of Sanskrit,
Utkal University,
Bhubaneswar

# भवभूतिकृतिषु अहिंसा

**Puspanjali Paikaray**

**उपक्रम:**

संस्कृतसाहित्ये भवभूतिः विशिष्टं स्थानं भजते । उत्तररामचरितस्य प्रस्तवनायां काणे-महोदयेन भवभूतिं प्रशंस्य लिखति यत् संस्कृतनाट्य तथा काव्यसाहित्यस्य नक्षत्रमण्डलेषु सर्वाधिक देदीप्यमानेषु नक्षत्रेषु भवभूतिः अन्यतमः, येन संस्कृतनाट्यसाहित्यं प्रति नूतना गतिः तथा नूतना दृष्टिः प्रदत्ता अस्ति । भवभूतिः करूणरसस्य सशक्तकविः आसीत् । करूणरसान् आधारीकृत्य विरचितम् उत्तररामचरितम् अस्य कवेः संस्कृतसाहित्ये वैशिष्ट्यं प्रतिपादयति, अतएव उत्कमसि **"कवयः कालिदासाद्याः भवभूतिर्महाकविः"**। **'पदवाक्यप्रमाणज्ञः'**महाकविः भवभूतिः नाटकत्रयं विरचितवान्, यथा – महावीरचरितम्, मालतीमाधवं एवञ्च उत्तररामचरितम् । अत्र सर्वत्र क्रमशः वीरशृङ्गारः तथा करूणरसस्य प्राधान्यता दृश्यते । रसपुष्टिदिशा तथा वर्णनाचातुर्यता-तारतम्यत्वात् विद्वद्धिः एतत् अनुमेयं यत् महावीरचरितम् अस्य कवेः प्रथमा कृति एव । तदनन्तरमेव मालतीमाधवं तथा उत्तररामचरितम् अनेन प्रणीतम् आसीत् । **'महावीरस्य रामस्य चरितं यत्र अथवा महावीरस्य चरितं महावीरचरितम्, अधिकृत्य कृतं नाटकं महावीरचरितम्'**इति विग्रहेन वीररसप्रधाने नाटकेऽस्मिन् सप्त अङ्का विद्यन्ते । अस्य कवेः द्वितीया कृतिः मालतीमाधवमेव । मालतीमाधवयोः विवाहप्रसङ्गमुररीकृत्य विरचिते शृङ्गाररसप्रधानेन नाटकेऽस्मिन् दश अङ्का वर्तन्ते । करूणरसप्रधाने उत्तररामचरिते सप्त अङ्काः विद्यन्ते । यत्तु अस्य कवेः अन्तिमा कृति एव । उत्तररामचरितं भवभूतेः विशिष्टकलायाः तथा उत्कर्षतायाः निदर्शनं वर्तते, यत्तु सर्वसम्मतमस्ति, अतएव विद्वद्धिः उक्तं वर्तते "उत्तररामचरिते भवभूतिर्विशिष्यते"इति ।

भवभूतिविरचितनाटकेषु नाट्यशैलीम् अतिरीच्य सन्ति केचन अन्तनिर्हिता लोकोपयोगिनः गुणाः, येषाम् अध्ययनम् अस्य शोधकार्यस्य मूलोद्देश्यम् । यथा – उत्तररामचरिते लोककल्याणाय रामः कथयति स्म -

> **स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।**
> **आराधनाय लोकानां मुचतो नास्ति मे व्यथा ।।**

भवभूतिविरचितनाटकनि संस्कृतरुपकसाहित्येषु अतीव गौरवान्वितानि तथा प्रतिभासम्पन्नानि शास्त्राणि भवन्ति। यत्र न केवलं साहित्यशास्त्रदिशा विचारा: वर्तन्ते, अपि च विविधलोक-कथानामपि उल्लेख: तत्र दरीदृश्यते। तत्तत्प्रसङ्गेऽपि अनेन महाकविना तात्कालिनसमाजे त्याग-दया-उदारता-अहिंसा- जनकल्याण तथा आचारप्रभृतिमानवीय-गुणानां नाटकान्तर्निहितर्सुणानाम् अध्ययनं यथा मति: मया क्रियते। येन मानवसमाजं प्रति भवभूते: विशिष्टम् अवदानं साधयितुं शक्यते।

भवभूतिविरचितं नाटकत्रयम् आधारीकृत्य विविधासु भाषासु टीका: तथा शोधपत्राणि च उपलभ्यन्ते। परन्तु एतेषु अनुवादग्रन्थेषु मुख्यतया साहित्यशास्त्रदृष्ट्या विचारविमर्श: दृश्यते। यद्यापि अन्यानि अपि प्रसङ्गानि प्राप्यन्ते तथापि तानि सीमितानि एव। एषु नाटकेषु वर्णिता: अन्येऽपि समाजोपयोगीविषया: लोककल्याणार्थं कदाचित् ज्ञेया: वर्त्तन्ते। एतेषु नाटकेषु एतादृशा:

बहवः श्लोकाः सन्ति येषां गणना अपि नीतिवाक्यत्वेन तथा आचारतत्त्वत्वेन कर्त्तुं शक्यते। एतेषां साधनं तथा प्रतिपादनम् अस्य शोधकार्यस्य मूललक्ष्यं भवति

**अहिंसायाः स्वरुपम् –**

नैतिकजीवनमूल्यन्तर्गतविषयः अहिंसा भवति। श्रीमद्भागवतपुराणे अहिंसाविषये यत् उक्तं **अहिंसा सत्यमस्तेयमसङ्को हीरसंचयः**। अपि च नारदपुराणे उक्तं-

**ये हिताः सर्वजन्तनां गातासूया अमत्सराः**
**वशिनो निस्प्रहाः शान्तास्ते वैभागवतोत्तयाः।**
**कर्मणा मनसां,वाचा परपीङां न कृर्वते**
**अपरिग्रह शीलश्च ते वैभागवताः स्मृताः।।**[1]
**आत्मवत् सर्वभूतानि ये पश्यन्ति निरुक्तमः**
**तुल्याशत्रुषु, मित्रेषु ते हि वहि भागवत्तोतया।।**[2]

अर्थात् यः सर्वेषां जनानां कृते हितोऽऽचरणं करोति, यः मनुष्यःपरेषां कृते सद्भावना प्राप्नोति सः विवेकपूर्वकजितेन्द्रियः भवति। यः प्राणिनः प्रति हिंसाभावनात्यागं करोति, सवैः सह मैत्रीभावना स्थापयति सः इहलोके परलोकेश्च बुद्धिमान्रुपेण गण्यते। यथा-

**" अहिंस्रः सर्वंभूतानां मैत्रायणगतश्चरेत्।**
**परिग्रहात्परित्यज्य भवेद्बृद्धया जितेन्द्रियः"।।**[3]

महर्षिपतञ्जलिः योगदर्शने अपि अहिंसाप्रतिष्ठायाम् वर्णनं कृत्वा अहिंसापालनस्य फलविषये प्रकाशयति। यथा- **अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।।**[4]

अर्थात् यतः अहिंसा धर्मं निर्णयो भवति ततः पुरुषः अन्तकरणात् वैरभावः दूरीभूतः जायते। तस्य पुरुषस्य संसर्गेण अपि अन्यपुरुषस्य वैरभावः दूरीभूतः भवति। कोऽपि मनुष्यस्य अन्तःकरणे सर्वथा सर्वदा सर्वभूतानां कृतेद्रोहः संजातः परन्तु अहिंसाव्रतपालनेन एतादृशः वैराग्यः जायते। अहिंसाव्रतग्रहणेन मनुषस्य हिंसा सदृशः वितर्क अज्ञानं सदृशः फलं विषये ज्ञायते एवं अहिंसाम् स्वस्य आधाररुपेण धारयति ततः सर्वेषां प्राणीनाम् हितार्थे स्वयं नियोजितः भवति।

**अहिंसायाः तात्पर्यार्थः -**

महर्षिमनुः मनुस्मृतेः यमनियमादि प्रतिपादनं कृत्वा वदति-

**" अहिंसा सत्यवचनं ब्रह्मचर्यमकल्पता।**
**अस्तेयमिति पञ्चैते यमाश्चोपत्रतानि च।।"**[5]

अर्थात् अस्मिन् संसारे यमादि श्रेष्ठनियमः अहिंसायाम् आश्रितः भवति। भवभूतिः तस्य नाटके चरित्रमाध्यमेन अहिंसाव्रतं पालनार्थं प्रतिपादयति। महावीरचरिते प्रथमाऽङ्के रामस्य अहिंसाभावस्य प्रतिफलनं दृश्यते। अतः रावणस्य एतादृशः कार्य्यकलापःदृष्ट्वापि तस्य प्रसंशाम् अकरोत्। अतः रामचन्द्रः कथयति -

**" यद्विद्वानपि तादृशोऽप्यभिजने धर्म्यत्पिथोऽपि च्युतः"**
**किं ब्रूमोऽत्र तदन्यदेव न वसन्त्येकत्र सर्वेगुणाः।।**[6]

महावीरचरिते दूितीयोऽङ्के भवभूतिः जामदग्न्यं एकः त्यागी, निस्पृहः च चरित्ररुपेण चित्रयति। यः एकविंशतिः मात्रे क्षत्रियस्योपरि अत्याचरः कृत्वा पृथ्वीं ब्रह्माज्ञानिषु समर्पितं अकरोत्। अपि च ऋषिब्रह्माणश्च तस्योपरि अभयप्रदानपूर्वकं कार्य्यं इच्छति। रावणं उदिश्य परशुरामः सन्देशं प्रेरयति यत् यः दण्डकारण्ये उपासना करोति तम् अभयदानं प्रदानं करोति। अतः माल्यवान् वदति यत्-

**" ब्रह्माणातिक्रमत्यागो भवतामेव भूतये।**
**झामदग्न्यश्च वो मित्रमन्यथा द्रमनायते।।"**[7]

अत्र परशुरामः अहिंसावृत्तिं परित्यागः कृत्वा उन्मादऽहंकारो हेतोः जामदग्न्यस्योपरि रामचन्द्रः विजयः प्राप्तः कृतवान्। परन्तु विजयप्राप्तवान् कृत्वा अपि रामचन्द्रः जामदग्न्यं प्रति समानप्रकारकं सम्मानप्रदर्शनं भवति । नम्रतया सभायुक्तश्च भवति परन्तु पराजितं परशुरामं प्रति एतादृशी भावना दृश्यते यथा गुरौ प्राग् विहितापराधः कृत्वा गुरोलज्जिते। उक्तं च-

**"वीरश्रिया च विनयेन च शोभमानो-**
**मान्ये मुनाववनतश्च गुणोत्रतश्च ।**
**लज्जां वहन्भृगुपतौ हृतवीरदर्पे-**
**शिष्यो गुराविवकृतप्रथमापचारः।।"**[8]

भवभूतिः एतादृशः प्रसङ्गमाध्यमेन दर्शयति यत् यथा चिकित्सकः शरीरिणः दण्डिनः दोषम् कायिकदोषोपचि तम् व्रणादि अन्यथा शश्त्रग्रहणातिस्किमार्गेणि अस्याध्यम् निर्हत्तुमशक्यम् परिच्छद्य निश्चित्य शस्त्रपाणिः व्रणशोधकच्छेदकास्त्रयुतकरः भविष्यति तथा राजा शरीरिणः दोषम् अकृत्यकरणकृत्याकरणयुपमविवेकम् अन्यथा शश्त्रग्रहणातिरिक्तहितोपदेशादिना असाध्यम् परिच्छिद्य निधार्य शश्त्रपाणिः प्रकाश्यति यत् जीवनरक्षार्थं यो हिंसावृत्तिः भवति सो हिंसा हिंसातुल्यं न भवति रामस्य जामदग्न्यं प्रति किञ्चित् शत्रुभावः प्रदर्शनं नास्ति परन्तु रामेण यत् किञ्चित् कार्य्यं सिद्धिर्भवति तत् तस्य रक्षणार्थं भवति अत्र जामदग्न्याः उक्तिं-

**पुण्या ब्रह्मणजातिरन्वयगुणः श्लाघ्यं चरित्रं च मे**
**येनैकेन हृतान्यमूनि हरता चैतन्यमात्रामपि।**
**एकः सन्नापि भूरिदोषगहनः सोऽर्थं त्वया प्रेयसा**
**वत्स ब्रह्मणवत्सलेन शमितः ज्ञेमाय दर्पामयः।।**[9]

रामचन्द्रः यस्य कष्टं दृष्ट्वा विचलितः भवति। तातस्य पितृसखत्वात् पूज्यस्य जतायोः विपत्तिजः मरणजन्मा शोकः दहति इति " न्याककरो हृदि वज्राकील इव मे तीव्रः परिस्पन्दते घोरन्धे तमसीव मज्जति मनः संमीलितं लज्जया शोकस्तातविपत्तिजो दहति मां नास्त्येव यस्मिन् क्रिया मर्माणीय पूनशिछनचि करूणा सीता वराकीं प्रति।।"

**घोरान्धे तमसीव मज्जति मनः संमीलितं लज्जया।**
**शोकस्ताताविपित्तिजो दहति मां नास्त्येव यस्मिन् क्रिया**
**मर्माणीव पुनश्छिनत्ति करूणा सीतां वराकीं प्रति।।**[10]

रामरावणयोः मध्ये युद्धश्तित्वापि न शष्टुभाव जायते अपितु रामचन्द्रः रावणस्य गुणो प्रशंसा करोति। यथा-

**यदिदूानपि ताद्दशोऽप्यभिजने धर्म्यात्पथोऽपि च्युतः**
**किं ब्रूमोऽत्र तदन्यदेव न वसन्त्येकत्र सर्वे गुणाः।**
**लीलानिर्जितषण्मुखाद्भगवतः श्रीजामदग्न्याद्दते**
**निर्विघ्नप्रतिविश्वविजयो वीरस्तु कस्ताद्दशः।।**[11]

अत्र रामचन्द्रस्यहिंसारहित: भवना हेतो: रावणस्य शत्रुगुणं परित्यकत्वा तस्य विदूनता, तस्य अभिजनवंशोविषये उक्तिं उपस्यापयति। एतादृश: विचार: अहिंसा: भावोचित: मन्यते। न केवलं महावीरचरिते अपितु उत्तररामचरिते भवभूति: प्रत्येकं पात्रचरित्रमध्ये अहिंसा गुणस्य वर्णनं दृश्यते। अहिंसा एतादृश: वृत्ति: यस्य पालनार्थं जना: पात्रचरित्रा: तत्पर: भवन्ति। प्रजापालनार्थं शीसेधार्य: राजा देशस्य सुख शान्तिश्च पालनार्थं शहिंसा परिपालयन्ति।

**उपसंहार:-**

**"अहिंसा परमो धर्म:"**इत्यनेन धर्मोत्कृष्टता सम्पादिताऽसीत् अहिंसाया:। यदि जनो जीवहिंसां न करोति स धर्मकार्येव भवति। धर्मदृष्ट्या जनस्य सच्चरणमार्ग: आदौ हिंसारहितत्वेन स्थितिरेव। वेद एव खलु अस्मन्मतस्य अतीव मुख्यं प्रमाणम्। वेदे तु **"सत्यंवद धर्मं चर"**इत्यादिना विधियते धर्म:। धर्मेषु परमो धर्म: अहिंसैव। तस्मात् धर्माचरणस्य आदौ आचरणीया अहिंसैवावश्यं भवति। हिंसनं नाम बाधाजननम्। अद्य अनेके जना: जलस्थान् जन्तून् हिंसन्ति तदितरांश्च। अपि च भक्षयन्ति तानेव। ततोऽधिकं सन्तोषमाप्नुवन्ति। स्वोदरपूणराय दुर्बलनां जन्तूनां हननमयुक्तम्। द्राविड़भाषायां तिसवळ्ळुवरनामा महान् मनीषी एव मभिप्रतिअहन्तरं हि जीवनाम् अनश्नन्तं तथाऽऽमिषम्। नमेय: प्राणिन्सर्वे साञ्चल्यत्र महीतले।। वाग्रहिता: जन्तव: स्वकीयां वाधां परस्मै कथयितुमशक्ता:। अतस्तेष्वेवावश्यं करणीया दया। एवं सति कठोरहृदयासन्त: तान् हिंसन्त्यस्मदीया:। यदि न हन्मस्तान् तर्हि किं न जीविष्यमो वयम् विस्मयनीयमिदं पश्यत–- बहवो जना: देवताभ्यो वलिं यच्छन्ति जन्तून् हत्वा महिष्यादीन्। दयामयो हि देव: सर्वानपि जन्तुविशेषान् एकयैव दृष्ट्या सृष्टवान्। भगवत: प्रेम एकधैव वर्त्तते सर्वेषु जन्तुषु। यथा लोके पिता स्वकीयेषु सर्वेषु पुत्रेषु समानतयक्षव वर्तते। आत्मन: पुत्राय यदि परोऽपकारं, ध्रुवं न सहते पिता तत्। अपकर्त्तारं हितं बोधयति। एवानपि तथैव न सहते कस्यचिदप्यपकारमपरस्य। आत्मन: प्रतिकुळानि परेषां न समाचरेत्- इति मनसि स्थूपानि अनन्यायेन निधातव्यं वाक्यम्। आत्मवत्सर्वभूतानि य: पश्यति स: पश्यति । पत्रं, पुष्पं, फलं, तोयमेतेषु यत्किमपि एकं भक्त्या जनो यदि प्रयच्छति तेनैवाहं तुष्टो भवामि इति किल भगवान्गीतासु घोषयति।

अतश्चावश्यमभ्युपेयमेतत् -

**येन केनाप्युपायेन यस्य कस्यापि देहिन:।**
**शन्तोषं जनयेत्प्राज्ञ: तदेवेश्वरपूजनम् ।।**

सन्तोषजननं शक्यते वा न वा दु:खजननं माऽस्त्वन्तत इति निर्धारणीयम्। भारते सर्वाण्यपि मतानि अहिंसाविषये समानाभिप्रायाण्येव।

देवसेवां विधातुकामा वहव: जना: हिंसां कृत्वा जन्तूनां, दैवकोपमेव सम्पादयन्तीति वक्तुं सुशकम्। यत: भगवदंशभूता: पशव:। तर्हि जीवहिंसा भगवत: कोपजनका इति न खलु वक्तव्यम्। यदि पर्वदिनमापतति तदा सन्त्यनेके कुककुटमन्यं वा प्राणिविशेषं निहत्य देवतायै **समर्पयाम् इति बुद्ध्या स्वयं भक्षयन्ति तन्मांसम्।**

**जुगुप्स्यं हि व्रणं मांसं प्राणिनामिति यो जन:।**
**जानीते प्राणिमांसं हि तेन स्वाद्यं न सर्वदा।।**

तिरुककुरळ् इति प्रसिद्ध: द्रविडवेद: प्रतिपादयति। न हिंसात्सर्वभूतानि..... इत्यापिवेद: सर्वदा समाशास्ति। प्राणिरक्षाधर्ममीहमानं दिलीपं तथा जीमूतवाहनमत्रोदाहरणतया स्मरन्तोऽपि, स्वयं न तथा भवितुमीहन्ते इव।

"जीवहिंसा माऽस्तु"इति उद्घोषयत्राजीवनं य आसीत् महात्मेति प्रसिद्ध:, स एव घातित:। यो हतवांस्तं, सोऽपि हन्तव्य एव वा इति विमर्शपरम्परा कथं शक्यसहा विचित्रेयं कर्मभूमि:। अस्माकं महास्वामिनस्तु आध्यात्मिकहिंसाऽपि हिंसैव, न केवलम् आधिभौतिकहिंसा इति भारतमातरं सम्मानयन्ति स्म । प्रात: स्मरणीयास्ते महात्मान: ब्रह्मभावेन भाविता:।

**सहायकग्रन्थसूची-**


१.उत्तररामचरति, भवभूतजीकेभट, पापुलरबुकस्टोर, सूरत १९५३

२.श्रीमद्भागवींता, हिन्दीभाष्यानुवादकार: (मदनमोहन अगरवाल्), चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९९६

३.उत्तररामचरति, ०पी०पी०काणेमोतीलालबनारसीदास१९६२

४.महावीरचरति, पणशीकरशास्त्रीद्वारासंशोधति, नर्णियसागरप्रेस, बम्बई१९२६

५.महावीरचरति, जे.पकिपोर्डटूबनरएण्डकम्पनी, लन्दन१८७१

६.मालतीमाधव, सी०आर०देवधरएवंएन०पी०सूरूपुर्युसनकॉलेज, पूना१९३५

७.मालतीमाधव, ०आर०पी०भण्डारकरगवर्नमेंन्टसेन्ट्रलबुकडपिो, बम्बईप्र. सं.१८७६एवंद्वसिं.१९०५

८.संस्कृतआलोचना, आचार्यबल्देवउपाध्यायहिन्दीसमिति, सूचना-विभाग, उ.प्र. १९६३

९.श्रीमद्भागवींता, हिन्दीभाष्यानुवादकार:(मदनमोहन अगरवाल्), चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९९६


**पादटिप्पण्य:**

1. भा.पु.११/१९/३३
2. ना.पु. ४/५
3. ना.पु.४४/६५
4. ना.पु.४४/६५
5. मनु.४/११
6. म.च.१/३३
7. म.च.२/१०
8. म.च.४/२०
9. म.च.४/२२
10. म.च.५/२२
11. म.च.१/३३